# শ্রীবিষ্ণুপঞ্জরস্তোত্রম্

{॥ শ্রীবিষ্ণুপঞ্জরস্তোত্রম্ ॥}

হরিরুবাচ ।

প্রবক্ষ্যাম্যধুনা হ্যেতদ্বৈষ্ণবং পঞ্জরং শুভম্ ।

নমোনমস্তে মোবিদং চক্রং গৃহ্য সুদর্শনম্ ॥ ১॥

প্রাচ্যাং রক্ষস্ব মাং বিষ্ণো ! ত্বামহং শরণং গতঃ ।

গদাং কৌমোদকীং গৃহ্ণ পদ্মনাভ নমোঽস্তু তে ॥ ২॥

যাম্যাং রক্ষস্ব মাং বিষ্ণো ! ত্বামহং শরণং গতঃ ।

হলমাদায় সৌনন্দে নমস্তে পুরুষোত্তম ॥ ৩॥

প্রতীচ্যাং রক্ষ মাং বিষ্ণো ! ত্বামহ শরণং গতঃ ।

মুসলং শাতনং গৃহ্য পুণ্ডরীকাক্ষ রক্ষ মাম্ ॥ ৪॥

উত্তরস্যাং জগন্নাথ ! ভবন্তং শরণং গতঃ ।

খড্গমাদায় চর্মাথ অস্ত্রশাস্ত্রাদিকং হরে ! ॥ ৫॥

নমস্তে রক্ষ রক্ষোঘ্ন ! ঐশান্যাং শরণং গতঃ ।

পাঞ্চজন্যং মহাশঙ্খমনুঘোষ্যং চ পঙ্কজম্ ॥ ৬॥

প্রগৃহ্য রক্ষ মাং বিষ্ণো আগ্নেয্যাং রক্ষ সূকর ।

চন্দ্রসূর্যং সমাগৃহ্য খড্গং চান্দ্রমসং তথা ॥ ৭॥

নৈরৃত্যাং মাং চ রক্ষস্ব দিব্যমূর্তে নৃকেসরিন্ ।

বৈজযন্তীং স্মপ্রগৃহ্য শ্রীবৎসং কণ্ঠভূষণম্ ॥ ৮॥

বাযব্যাং রক্ষ মাং দেব হযগ্রীব নমোঽস্তু তে ।

বৈনতেযং সমারুহ্য ত্বন্তরিক্ষে জনার্দন ! ॥ ৯॥

মাং রক্ষস্বাজিত সদা নমস্তেঽস্ত্বপরাজিত ।

বিশালাক্ষং সমারুহ্য রক্ষ মাং ত্বং রসাতলে ॥ ১০॥

অকূপার নমস্তুভ্যং মহামীন নমোঽস্তু প্তে ।

করশীর্ষাদ্যঙ্গুলীষু সত্য ত্বং বাহুপঞ্জরম্ ॥ ১১॥

কৃত্বা রক্ষস্ব মাং বিষ্ণো নমস্তে পুরুষোত্তম ।

এতদুক্তং শঙ্করায বৈষ্ণবং পঞ্জরং মহত্ ॥ ১২॥

পুরা রক্ষার্থমীশান্যাঃ কাত্যাযন্যা বৃষধ্বজ ।

নাশাযামাস সা যেন চামরান্মহিষাসুরম্ ॥ ১৩॥

দানবং রক্তবীজং চ অন্যাংশ্চ সুরকণ্টকান্ ।

Stotram Digitalized By Sanskritdocuments.org

এতজ্জপন্নরো ভক্ত্যা শত্রূন্বিজযতে সদা ॥ ১৪ ॥

ইতি শ্রীগারুডে পূর্বখণ্ডে প্রথমাংশাখ্যে আচারকাণ্ডে

বিষ্ণুপঞ্জরস্তোত্রং নাম ত্রযোদশোঽধ্যাযঃ

Garudapurana 1.13.1-14

Proofread by

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org


Vishnu Panjara Stotram ( From Garuda Puranam ) Lyrics in Bengali PDF
% File name : viShNupanjaragaruDapurANa.itx
% Category : upaniShat
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Description-comments : Garudapurana 1.13.1-14
% Latest update : July 28, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%


We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.

Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website